# .. Renuka Stotram from Vayupuranam ..

# ॥ રેણુકાસ્તોત્રં શ્રીવાયુપુરાણે શ્રીપરશુરામકૃતમ્ ॥

## Document Information

Text title : reNukAstotraM vAyuprANAntargatam parashurAmaproktam

File name : reNukAstotramvAyupurANa.itx

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Kaushal S. Kaloo kaushalskaloo at gmail.com

Proofread by : Kaushal S. Kaloo kaushalskaloo at gmail.com, PSA Easwaran psaeaswaran at gmail.com

Description-comments : vAyuprANa location is not known

Latest update : June 22, 2013

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ રેણુકાસ્તોત્રં શ્રીવાયુપુરાણે શ્રીપરશુરામકૃતમ્ ॥

શ્રીગણેશાય નમઃ ।
શ્રીસરસ્વત્યૈ નમઃ ।
શ્રીગુરુભ્યો નમઃ ।
શ્રીરેણુકામ્બાયૈ  નમઃ ।
ૐ નમઃ પરમાનન્દે સર્વદેવમયી શુભે ।
અકારાદિ-ક્ષકારાન્તં માતૃકા મન્ત્રમાલિની ॥ ૧॥

એકવીરે એકરૂપે મહારૂપે અરૂપિણિ ।
અવ્યક્તે વ્યક્તિમાપન્ને ગુણાતીતે ગુણાત્મિકે ॥ ૨॥

કમલે કમલાભાસે હૃત્સચ્ચિત્તરણિકાલયે ।
નાભિચક્રસ્થિતે દેવિ કુણ્ડલી તન્તુરૂપિણિ ॥ ૩ ॥

વીરમાતા વીરબન્ધ્યા યોગિની સમરપ્રિયે ।
વેદમાતા વેદગર્ભે વિશ્વગર્ભે નમોઽસ્તુ તે ॥ ૪ ॥

રામમાતર્નમસ્તુભ્યં નમસ્ત્રૈલોક્યરૂપિણિ ।
મહ્યાદિકે પઞ્ચભૂતા જમદગ્નિપ્રિયે શુભે ॥ ૫ ॥

યૈસ્તુ ભક્ત્યા સ્તુતા ધ્યાતા અર્ચયિત્વાઽર્પિતે શુભે ।
ભોગમોક્ષપ્રદે દેવિ કામેશ્વરિ નમોઽસ્તુ તે ॥ ૬॥

નમોઽસ્તુ તે નિરાલમ્બે પરમાનન્દવિગ્રહે ।
પઞ્ચભૂતાત્મિકે દેવિ ભૂતભાવિવર્જિતે ॥ ૭॥

મહારૌદ્રે મહાકાયે સૃષ્ટિસંહારકારિણિ ।
બ્રહ્માણ્ડગોલકાકારે વિશ્વરૂપે નમોઽસ્તુ તે ॥ ૮॥

ચતુર્ભુજે ખડ્ગહસ્તે મહાડમરુધારિણિ ।
શિરઃપાત્રધરે દેવિ એકવીરે નમોઽસ્તુ તે ॥ ૯॥

નીલામ્બરે નીલવર્ણે મયૂરપિચ્છધારિણિ ।
વનભિલ્લધનુર્વામે દક્ષિણે બાણધારિણિ ॥ ૧૦॥

રૌદ્રકાયે મહાકાયે સહસ્રાર્જુનભઞ્જનિ ।
એકં શિરઃ પુરા સ્થિત્વા રક્તપાત્રે ચ પૂરિતમ્ ॥ ૧૧॥

મૃતધારા પિબન્દેવિ રુધિરં દૈત્યદેહજમ્ ।
રક્તવર્ણે રક્તદન્તે ખડ્ગલાઙ્ગલધારિણિ ॥ ૧૨॥

વામહસ્તે ચ ખટ્વાઙ્ગં ડમરું ચૈવ દક્ષિણે ।

પ્રેતવાહનકે દેવિ-ઋષિપત્ની ચ દેવતે ॥ ૧૩ ॥

એકવીરે મહારૌદ્રે માલિની વિશ્વભૈરવિ ।
યોગિની યોગયુક્તા ચ મહાદેવી મહેશ્વરી ॥ ૧૪॥

કામાક્ષી ભદ્રકાલી ચ હુઙ્કારી ત્રિપુરેશ્વરી ।
રક્તવસ્ત્રે રક્તનેત્રે મહાત્રિપુરસુન્દરિ ॥ ૧૫॥

રેણુકા સૂનુયોગી ચ ભક્તાનામભયઙ્કરી ।
ભોગલક્ષ્મીર્યોગલક્ષ્મીર્દિવ્યલક્ષ્મીશ્ચ સર્વદા ॥ ૧૬॥

કાલરાત્રિ મહારાત્રિ મદ્યમાંસશિવપ્રિયે ।
ભક્તાનાં શ્રીપદે દેવિ લોકત્રયવિમોહિનિ ॥ ૧૭॥

ક્લીઙ્કારી કામપીઠે ચ હ્રીઙ્કારી ચ પ્રબોધ્યતા ।
શ્રીઙ્કારી ચ શ્રિયા દેવિ સિદ્ધલક્ષ્મીશ્ચ સુપ્રભા ॥ ૧૮॥

મહાલક્ષ્મીશ્ચ કૌમારી કૌબેરી સિંહવાહિની ।
સિંહપ્રેતાસને દેવિ રૌદ્રિ ક્રૂરાવતારિણિ ॥ ૧૯॥

દૈત્યા નારી કુમારી ચ રૌદ્રદૈત્યનિપાતિની ।
ત્રિનેત્રા શ્વેતરૂપા ચ સૂર્યકોટિસમપ્રભા ॥ ૨૦॥

ખડ્ગિની બાણહસ્તા ચારૂઢા મહિષવાહિની ।
મહાકુણ્ડલિની સાક્ષાત્ કઙ્કાલી ભુવનેશ્વરી ॥ ૨૧॥

કૃત્તિવાસા વિષ્ણુરૂપા હૃદયા દેવતામયા ।
દેવમારુતમાતા ચ ભક્તમાતા ચ શઙ્કરી ॥ ૨૨॥

ચતુર્ભુજે ચતુર્વક્ત્રે સ્વસ્તિપદ્માસનસ્થિતે ।
પઞ્ચવક્ત્રા મહાગઙ્ગા ગૌરી શઙ્કરવલ્લભા ॥ ૨૩ ॥

કપાલિની દેવમાતા કામધેનુસ્ત્રયોગુણી ।
વિદ્યા એકમહાવિદ્યા શ્મશાનપ્રેતવાસિની ॥ ૨૪॥

દેવત્રિગુણત્રૈલોક્યા જગત્ત્રયવિલોકિની ।
રૌદ્રા વૈતાલિ કઙ્કાલી ભવાની ભવવલ્લભા ॥ ૨૫॥

કાલી કપાલિની ક્રોધા માતઙ્ગી વેણુધારિણી ।
રુદ્રસ્ય ન પરાભૂતા રુદ્રદેહાર્દ્ધધારિણી ॥ ૨૬॥

જયા ચ વિજયા ચૈવ અજયા ચાપરાજિતા ।
રેણુકાયૈ નમસ્તેઽસ્તુ સિદ્ધદેવ્યૈ નમો નમઃ ॥ ૨૭॥

શ્રિયૈ દેવ્યૈ નમસ્તેઽસ્તુ દીનનાથે નમો નમઃ ।

જય ત્વં દેવદેવેશિ સર્વદેવિ નમોઽસ્તુ તે ॥ ૨૮॥

દેવદેવસ્ય જનનિ પઞ્ચપ્રાણપ્રપૂરિતે ।
ત્વત્પ્રસાદાય દેવેશિ દેવાઃ ક્રન્દન્તિ વિષ્ણવે ॥ ૨૯॥

મહાબલે મહારૌદ્રે સર્વદૈત્યનિપાતિનિ ।
આધારા બુદ્ધિદા શક્તિઃ કુણ્ડલી તન્તુરૂપિણી ॥ ૩૦॥

ષટ્ચક્રમણે દેવિ યોગિનિ દિવ્યરૂપિણિ ।
કામિકા કામરક્તા ચ લોકત્રયવિલોકિની ॥ ૩૧॥

મહાનિદ્રા મદ્યનિદ્રા મધુકૈટભભઞ્જિની ।
ભદ્રકાલી ત્રિસન્ધ્યા ચ મહાકાલી કપાલિની ॥ ૩૨॥

રક્ષિતા સર્વભૂતાનાં દૈત્યાનાં ચ ક્ષયઙ્કરી ।
શરણ્યં સર્વસત્ત્વાનાં રક્ષ ત્વં પરમેશ્વરિ ॥ ૩૩॥

ત્વામારાધયતે  લોકે તેષાં રાજ્યં ચ ભૂતલે ।
આષાઢે કાર્તિકે ચૈવ પૂર્ણે પૂર્ણચતુર્દશી  ॥ ૩૪॥

આશ્વિને પૌષમાસે ચ કૃત્વા પૂજાં પ્રયત્નતઃ ।
ગન્ધપુષ્પૈશ્ચ નૈવેદ્યૈસ્તોષિતાં પઞ્ચભિઃ સહ ॥ ૩૫॥

યં યં પ્રાર્થયતે નિત્યં તં તં પ્રાપ્નોતિ નિશ્ચિતમ્ ।
તત્ત્વં મે વરદે દેવિ રક્ષ માં પરમેશ્વરિ ॥ ૩૬॥

તવ વામાઙ્કિતં દેવિ રક્ષ મે સકલેશ્વરિ ।
સર્વભૂતોદયે દેવિ પ્રસાદ વરદે શિવે ॥ ૩૭॥

શ્રીદેવ્યુવાચ
વરં બ્રૂહિ મહાભાગ રાજ્યં કુરુ મહીતલે ।
મામારાધ્યતે લોકે ભયં ક્વાપિ ન વિદ્યતે ॥ ૩૮॥

મમ માર્ગે ચ આયાન્તી ભીર્દેવી મમ સન્નિધૌ ।
અભાર્યો લભતે ભાર્યાં નિર્ધનો લભતે ધનમ્ ॥ ૩૯॥

વિદ્યાં પુત્રમવાપ્નોતિ શત્રુનાશં ચ વિન્દતિ ।
અપુત્રો લભતે પુત્રાન્ બદ્ધો મુચ્યેત બન્ધનાત્ ॥ ૪૦॥

કામાર્થી લભતે કામં રોગી આરોગ્યમાપ્નુયાત્ ।
મમ આરાધનં નિત્યં રાજ્યં પ્રાપ્નોતિ ભૂતલે ॥ ૪૧॥

સર્વકાર્યાણિ સિધ્યન્તિ પ્રસાદાન્મે ન સંશયઃ ।
સર્વકાર્યાણ્યવાપ્નોતિ દીર્ઘાયુશ્ચ લભેત્સુખી ॥ ૪૨॥

શ્રીપરશુરામ ઉવાચ
અત્ર સ્થાનેષુ ભવતાં અભયં કુરુ સર્વદા ।
યં યં પ્રાર્થયતે નિત્યં તં તં પ્રાપ્નોતિ નિશ્ચિતમ્ ॥ ૪૩ ॥

પ્રયાગે પુષ્કરે ચૈવ ગઙ્ગાસાગરસઙ્ગમે ।
સ્નાનં ચ કુરુતે નિત્યં નિત્યં ચ ચરણોદકે ॥ ૪૪॥

ઇદં સ્તોત્રં પઠેન્નિત્યં ત્રિસન્ધ્યં શ્રદ્ધયાન્વિતઃ ।
સર્વાન્ કામાનવાપ્નોતિ પ્રાપ્યતે પરમં પદમ્ ॥ ૪૫॥

ઇતિ શ્રીવાયુપુરાણે પરશુરામકૃતં શ્રીરેણુકાસ્તોત્રં સમ્પૂર્ણમ્ ॥

॥ શ્રીરેણુકાર્પણમસ્તુ ॥

Encoded and proofread by Kaushal S. Kaloo kaushalskaloo at gmail.com
Proofread by PSA Easwaran psaeaswaran at gmail.com

.. Renuka Stotram from Vayupuranam ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*